Shri Raghunatha Temple MSS. Library,
JAMMU

No. ३४२ / घ

Title काव्यालङ्कार सूत्रवृत्तिः

Author वामनाचार्यः

Extent २० पत्र Age

Subject अलङ्कार शास्त्र

काव्यालंकारसूत्रवृत्तिः

श्रीगणेशाय नमः ॥ प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ॥ काव्यालंकारसूत्राणां स्वेषां वृत्तिर्विधी-
यते ॥ १ ॥ काव्यं ग्राह्यमलंकारात् ॥ काव्यं खलु ग्राह्यमुपादेयं भवत्यलंकारात् ॥ काव्यशब्दो गुणालं-
कारसंस्कृतयोः शब्दार्थयोर्वर्त्तते ॥ भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते ॥ कोऽसावलंकार इत्यत आ-
ह ॥ सौंदर्यमलंकारः ॥ अलंकृतिरलंकारः ॥ करणव्युत्पत्त्या पुनरलंकारशब्दोऽयमुपमादिषु वर्त्तते ॥ स
दोषगुणालंकारहानादानाभ्याम् ॥ स खल्वयमलंकारो दोषहानाद्गुणालंकारादानाच्च संपाद्यः
कवेः ॥ शास्त्रतस्ते ॥ ते दोषगुणालंकारहानोपादाने शास्त्रादस्मात् ॥ शास्त्रतो ह्यज्ञात्वा दोषं जह्याद्गुणा-
लंकारांश्चाददीतेति ॥ किं पुनः फलमलंकारवता काव्येन ॥ येनैतदर्थोऽयं यत्न इत्यत आह ॥ का-
व्यं सत् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात् ॥ काव्यं सच्चारु दृष्टप्रयोजनं प्रीतिहेतुत्वात् ॥ अदृष्टप्र-
योजनं कीर्तिहेतुत्वात् ॥ अत्र श्लोकः ॥ प्रतिष्ठां काव्यबंधस्य यशसः सरणिं विदुः ॥ अकीर्तिव-
र्त्तिनीं त्वेवं कुकवित्वविडंबनां ॥ १ ॥ कीर्तिं स्वर्गफलामाहुरासंसारं विपश्चितः ॥ अकीर्तिं च निरालो-
कनरकोद्देशदूतिकां ॥ २ ॥ तस्मात्कीर्तिमुपादातुमकीर्तिं च व्यपोहितुं ॥ काव्यालंकारसूत्रार्थः प्र-
साद्यः कविपुंगवैः ॥ ३ ॥ ॥ इति श्रीवामनकृतायां काव्यालंकारसूत्रवृत्तौ शारीरे प्रथमोऽध्यायः ॥ ॥

रसा

धिकरणे काव्यप्रयोजनस्याप

स्तत्प्रयोजनस्थापनं॥ अधिकारिनिरूपणार्थमाह॥ अरोचकिनः सतृणाभ्यवहारिणश्च॥ इह ख
लु द्वये कवयः सम्भवन्ति॥ अरोचकिनः सतृणाभ्यवहारिणश्चेति॥ अरोचकिसतृणाभ्यवहा
रिशब्दौ गौणार्थौ॥ कोऽसावर्थो विवेकित्वमविवेकित्वं च॥ यथाह॥ पूर्वे शिष्या विवेकित्वात्॥
पूर्वे अरोचकिनः शिष्याः शासनीयाः विवेकित्वाद्विवेचनशीलत्वात्॥ नेतरे तद्विपर्ययात्॥
इतरे सतृणाभ्यवहारिणो न शिष्यास्तद्विपर्ययादविवेचनशीलत्वात्॥ न च शीलमपाकर्तुं
न शक्यं॥ नन्वेवं शास्त्रं सर्वानुग्राहि स्यात्॥ को वा मन्यते नेत्याह॥ न शास्त्रमद्रव्येष्वर्थवत्॥ न
विवेकिशिष्य खलु शास्त्रमद्रव्येष्वर्थवत्॥ निदर्शनार्थमाह॥ न कतकं पङ्कप्रसादाय॥ नहि कतकं पयस इव
पंकस्य प्रसादाय भवति॥ अधिकारिणो प्ररीतिनिश्चयार्थमाह॥ रीतिरात्मा काव्यस्य॥ रीतिर्ना
मेयमात्मा काव्यस्य शरीरस्येवेति वाक्यशेषः॥ का पुनरियं रीतिरित्याह॥ विशिष्टा पदरचना रीतिः॥
विशेषवती पदानां रचना रीतिः॥ कोऽसौ विशेष इत्यत आह॥ विशेषो गुणात्मा॥ वक्ष्यमाणगुणस्व
रूपो विशेषः॥ सा त्रिधा॥ वैदर्भी गौडी पाञ्चाली चेति॥ सा चैषं रीतिस्त्रिधा भिद्यते वैदर्भी गौडी
पांचाली चेति॥ किं पुनर्देशविशेषवशाद्द्रव्यवद्गुणोत्पत्तिः काव्यानां येनायं देशविशेषव्यपदेशः॥ नैवं॥

यदाह॥ विदर्भादिषु दृष्टत्वात्तत्समाख्या॥ विदर्भगौडपांचालेषु देशेषु तत्रत्यैः कविभिर्यथास्व
रूपमुपलब्धत्वात्॥ तत्समाख्या॥ न पुनर्देशैः किंचिदुपक्रियते काव्यानां॥ तासां गुणभेदाद्भेदमाह॥
समग्रगुणा वैदर्भी॥ समग्रैरोजःप्रसादप्रभृतिभिर्गुणैरुपेता वैदर्भी नाम रीतिः॥ अत्र श्लो
कः॥ अस्पृष्टा दोषमात्राभिः समग्रगुणगुंफिता॥ विपंचीस्वरसौभाग्या वैदर्भी रीतिरिष्यते॥ ५॥
५ तामेतामेवं स्तुवंति कवयः॥ सति वक्तरि सत्यर्थे सति शब्दानुशासने॥ अस्ति तन्न विनाये
न परिस्रवति वाङ्मधु॥ ६॥ अत्रोदाहरणं॥ गाहंतां महिषा निपानसलिलं शृंगैर्मुहुस्ताडितं
छायाबद्धकदंबकं मृगकुलं रोमंथमभ्यस्यतु॥ विस्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः
पल्वले विश्रांतिं लभतामिदं च शिथिलज्याबंधमस्मद्धनुः॥ १॥ ओजःकांतिमती गौडीया॥ ओजः २
म्ब कांतिश्च विद्येते यस्यां सा ओजःकांतिमती गौडीया नाम रीतिः॥ माधुर्यसौकुमार्ययोरभावात्समास
बहुलात्युल्वणपदा च॥ अत्र श्लोकः॥ समस्तात्युत्कटपदामोजःकांतिगुणान्वितां॥ गौडी
यामिति गायंति रीतिं रीतिविचक्षणाः॥ १॥ उदाहरणं॥ दोर्दंडांचितचंद्रशेखरधनुर्दंडावभंगो
द्यतष्टंकारध्वनिरार्यबालचरितप्रस्तावनाडिंडिमः॥ द्राक्पर्यस्तकपालसंपुटमितब्रह्मांडभां
डोदरभ्राम्यत्पिंडितचंडिमा कथमहो नाद्यापि विश्राम्यति॥ १॥ माधुर्यसौकुमार्योपपन्ना पांचाली॥

माधुर्येणसौकुमार्येण च गुणेनोपपन्ना पांचाली नाम रीतिः॥ ओजःकांत्यभावादनुल्बणपदा वि
छाया च॥ अत्र श्लोकः॥ आश्लिष्टश्लथभावां तो पुराणछाययान्वितां॥ मधुरां सुकुमारां च पां
चालीं कवयो विदुः॥ १॥ उदाहरणं॥ ग्रामेस्मिन् पथिकाय पांथवसतिर्नैवाधुना दीयते रात्राव
त्र विहारमंडपतले पांथः प्रसुप्तो युवा॥ तेनोत्थाय खलेन गर्जति घने स्मृत्वा प्रियां तत्कृतं
येनाद्यापि करंकदंडपतनाशंकी जनस्तिष्ठति॥ एतासु तिसृषु रीतिषु रेखास्विव चित्रं काव्यं
प्रतिष्ठितमिति॥ तासां पूर्वा ग्राह्या गुणसाकल्यात्॥ एतासां तिसृणां रीतीनां पूर्वा वैदर्भी ग्रा
ह्या गुणसाकल्यात्॥ न पुनरितरे स्तोकगुणत्वात्॥ इतरे गौडीपांचाल्यौ न ग्राह्ये स्तोक
स्वल्पगुणत्वा गुणत्वात्॥ तदारोहणार्थमितराभ्यास इत्येके॥ तस्या वैदर्भ्या आरोहणार्थमितरयोरपि री
त् त्योरभ्यास इत्येके मन्यन्ते॥ तन्नु न॥ अतत्वशीलस्य तत्वानिष्पत्तेः॥ न ह्यतत्वं शीलयतस्तत्वं
हि त्वं निःपद्यते॥ निदर्शनार्थमाह॥ न शणसूत्रवाने त्रसरसूत्रवानवैचित्र्यला ण
भः॥ न हि शणसूत्रवानमभ्यस्यन् कुविंदस्त्रसरसूत्रवानवैचित्र्यं लभते॥ सापि समासाभावे शु
द्धवैदर्भी रीतिः॥ शुद्धवैदर्भी भण्यते॥ यदि समासपदं न भवति॥ तस्यामर्थगुणसंपदास्वाद्या॥

वानर ति

ग्ररा
द्वि
3

तस्यां वैदर्भ्यामर्थगुणसंपदास्वाद्या भवति ॥ तदुपरोहादर्थगुणलेशोऽपि ॥ तदुपारोहान्नतो
ऽन्यार्थलेशोपि स्वदते ॥ किमंग पुनरर्थगुणसंपत् ॥ तथा चाहुः ॥ अस्त्यवकाविदपरैरप
दानुपूर्वी यस्यां न किंचिदपि वे किंचिदियी भोयेति ॥ आनंदयत्यथ च कर्णपथं प्रयाता चेतः
सतामसृतवृष्टिरिव प्रविष्टा ॥ १ ॥ वचसि यमधिगम्य स्पंदते वाचकश्री । वितथमवितथत्वं या
ति यत्र वस्तु प्रयाति ॥ उदयति हि स तादृक्क्वापि वैदर्भरीतौ सहृदयहृदयानां रंजकः को
ऽपि पाकः ॥ २ ॥ सापीयं वैदर्भीति स्यात् ॥ सापी यमर्थगुणसंपद्वैदर्भीत्युक्ता ॥ तास्थ्या
दित्युपचारतो व्यवहारं दर्शयति ॥ ॥ इति श्री काव्यालंकारसूत्रवृत्तौ शारीरे प्रथमेऽधि
करणे द्वितीयोऽध्यायः ॥ ॥ अधिकारिचिंतारीतिनिश्चयश्च ॥ रीतितत्वनिरूप्य
काव्यांगान्युपदर्शयितुमाह ॥ लोको विद्याः प्रकीर्णं च काव्यांगानि ॥ उद्देशक्रमेण व्याच ३
ष्टे ॥ लोकवृत्तं लोकः ॥ लोकः स्थावरजंगमात्मा तस्य वर्तनं वृत्तमिति स्वरूपं ॥ शब्दस्मृत्यभि
धानकोशछंदोविचितिकलाकामशास्त्रदंडनीतिपूर्वा विद्याः ॥ शब्दस्मृत्यादीनां तत्पूर्वक
त्वं पूर्वं काव्यबन्धस्यापेक्षणीयत्वात् ॥ तासां काव्यांगत्वे योजयितुमाह ॥ शब्दस्मृतेः शब्दशुद्धिः ॥

पि

शब्दस्मृतेर्व्याकरणाच्छब्दानां शुद्धिः साधुत्वनिश्चयः॥ शुद्धान्येव पदानि निःकंपैः काव्यनिश्चयुञ्ज्यं
ते॰ इति॥ अभिधानकोशात्पदार्थानिश्चयः॥ पदं हि रचनाप्रवेशायोग्यमावयत्संदिग्धार्थत्वेन न ननु
स्फोपात्॥ न वा उणादिनिका प्रबंधविघ्नः॥ तस्मादभिधानकोशतः पदार्थनिश्चयं इति॥ अस्त्वो
लाभा भिधानकोशार्थत्वेन प्रयुक्तमभिधानकोशस्य॥ अप्रयुक्तस्याप्रयोज्यत्वात्॥ यदि तर्हि प्रयुक्तं प्रयुज्य
त्व ते किमिति संदिग्धार्थे मृग्यो कोन पदस्य॥ तन्न॥ तत्र सामान्येनार्थावगतिः संभवति॥ यथा नीवीशब्देन
जघनवस्त्रग्रंथिरुच्यत इति कस्यचित् निश्चयः॥ स्त्रिया वा पुरुषस्यापि वाससोपाय॥ नीवी नु ... न नो
र्जघनस्थस्य वाससः॥ इति नाममालाप्रतीकमपश्यतः॥ अथ कथं केनचित् स्त्रीकोनीवीबंधः ...
कृत इति प्रयोगः॥ ... रूपचारात्॥ छंदोवृत्तेर्वृत्तसंशयच्छेदः काव्याभ्यासादृत्तसंकीर्णिसेव॥ किं
तु मात्रावृत्तादिषु क्वचित् संशयः स्यात्। अतो वृत्तसंशयच्छेदः छंदोविचितेर्विधेयः॥ कलाशास्त्रेभ्यः
कलातत्त्वस्य संवित्॥ कलागीतनृत्यचित्रादिकास्तासामभिधायकानि शास्त्राणि विशाखिलादिप्र
णीतानि कलाशास्त्राणि तेभ्यः कलातत्त्वस्य संविदिति संवेदनं॥ नहि कलातत्त्वानुपलब्धौ कलावस्तु
स्पृशिवंमुं शक्यं॥ कामशास्त्रतः कामोपचारस्य संविदित्यनुवर्तते॰ कामोपचारस्य साव कामशास्त्रतः इति

दि प्य पा स्त्र

कामोपचारबहुलं हि वस्तु काव्यस्येति ॥ दण्डनीतेर्नयापनययोः ॥ दण्डनीतेरर्थशास्त्रान्नयस्यापनयस्य
च संविदिति ॥ अत्र षाड्गुण्यस्य यथावत्प्रयोगो नयः ॥ तद्विपरीतोऽनयः ॥ न हि तावविज्ञाय
नायकप्रतिनायकयोर्वृत्तं काव्ये पुनिवद्धुं शक्यमिति ॥ इतिवृत्तकुटिलत्वं चानेन ॥ इतिहासादेर्वृत्त पिरिति
काव्यार्थशरीरं तस्य कुटिलत्वं ततो दण्डनीतेर्वलीयस्त्वाऽवलीयस्त्वादि ग्रयौगव्युत्पत्तिनिमि
त्तत्वात्तस्याः ॥ एवमन्यासामपि विद्यानां यथास्वरूपमुपयोगो वर्णनीय इति । लक्ष्यज्ञत्वमभि
योगो वृद्धसेवावेक्षणं प्रतिभानमवधानं च प्रकीर्णं ॥ तत्र काव्यपरिचयो लक्ष्यज्ञत्वं ॥ अन्येषां
काव्यस्य परिचयो लक्ष्यज्ञत्वं ततो व्युत्पत्तिर्भवति ॥ काव्यवन्धोद्यमोऽभियोगः ॥ काव्यवन्धस्य
सुश्रूषणं बन्धनैकाव्यवन्धोरचनातत्त्वोद्यमोऽभियोगः ॥ स चकाविस्त्वप्रकर्षमारोपयति ॥ काव्योपदेशगु ४
वृ रुसेवा ॥ काव्योपदेशगुरवः ॥ उपदेष्टारः ॥ तेषां शुश्रूषणं वृद्धसेवा ॥ ततः काव्यविद्यायाः संक्रान्तिर्भवति
पदाधानोद्धरणमवेक्षणं ॥ पदस्याधानं न्यासः ॥ उद्धरणमपसारणं ॥ तत्त्वलोचनवेक्षणं ॥ तत्र श्लो
कौ ॥ आधानोद्धरणे तावद्यावद्दोलायते मनः ॥ पदस्य स्थापिते स्थैर्ये हन्त सिद्धा सरस्वती ॥ १ ॥
त्पदानि त्यजन्त्येव परिवृत्तिसहिष्णुतां ॥ तं शब्दन्यासनिष्णाता नोऽर्थपाकं प्रचक्षते ॥ आग

काव्योपदेशगुरवः ४

तस्य बीजं प्रतिभानं जन्मांतरगत १ द्वबीजा १

कवित्वबीजं प्रतिभानं ॥ कवित्वस्य बीजं कवित्वबीजं संस्कारविशेषः कश्चित् ॥ यस्माद्विना काव्यं
न निष्पद्यते ॥ निष्पन्नं वा उपहसनीयं स्यात् ॥ चित्तैकाग्र्यमवधानं ॥ भिन्ने कारग्र्य मनयेति च
त्तिस्वदवधानं ॥ अवहितचित्तमेनर्थान्पश्यति ॥ तद्देशकालाभ्यां ॥ तदवधानं देशकालाभ्यां सं
पद्यते ॥ कोऽसौ पुनर्देशकालौ चित्याह ॥ विविक्तो देशः ॥ विविक्तो विजनः ॥ रात्रियामस्तुरीयः का
लः ॥ रात्रेर्यामो रात्रियामः प्रहरस्तुरीयश्चतुर्थ इति ॥ तद्धि पयो परं तं प्रसन्नं चित्तमवधत्ते ॥ ए
वं काव्यांगान्युपदर्श्य काव्यविशेषस्वरूपमाह ॥ काव्यं गद्यपद्यं च ॥ गद्यस्य पूर्वनिर्दिष्टा
दर्शस्य विशेषत्वेनहृद्यघटनात् ॥ गद्यं कवीनां निकषं वदंति ॥ तच्च त्रिधा भिन्नमभिदर्शयति ॥
गद्यं वृत्तगन्धि चूर्णमुत्कलिकाप्रायं च ॥ तल्लक्षणान्याह ॥ पद्यभागवद्वृत्तगन्धि ॥ पद्यस्य भागाः
पादभागाः तद्वद्वृत्तगन्धि यथा ॥ पातालतालुतलवासिषु दानवेषु इति ॥ न चाहं वसन्ततिल
कस्य पादस्तुर्भागः प्रसमिज्ञायते ॥ अनाविद्धललितपदं चूर्णं ॥ अनाविद्धान्यदीर्घसमासानि अ
नुद्धतानि पदानि यस्मिन् तद् अनाविद्धललितपदं चूर्णमिति ॥ यथा ॥ अभ्यासो हि कर्मणां कौ
शलमावहति ॥ न हि सकृन्निपातमात्रेणोदविन्दुरपि ग्रावणि निम्नतामादधाति ॥ विपरीत

 त्पर्यायेण अनिबद्धं निबद्धं च पराम् ॥२ अथ तेन क्रमेण सिद्धिः क्रमसिद्धिः अनिबद्धसिद्धौ निबद्धसिद्धिः ॥५
मुक्तकालिकाप्रायं ॥ विपरीतमनिबद्धं तत्पदमुक्तकालिकाप्रायं ॥ यथा ॥ कुलिशशिखरखरनखर
प्रचयप्रचण्डचपेटापाटितमत्तमातङ्गकुम्भस्थलगलन्मदच्छटाच्छुरितचारुकेसरभारभासुरमु
खे केसरिणि ॥ पद्यमनेकभेदम् ॥ तस्य खल्वेकेन समार्द्धसमविषमादिना भेदेन भेदो न भवति ॥
तदनिबद्धं निबद्धं च ॥ नादितस्तत्पद्यरूपकाव्यमनिबद्धं बद्धं चानयोः प्रसिद्धत्वाल्लक्षणं शक्यं क्रम
सिद्धिस्तयोः स्रगुत्तंसवत् ॥ स्रगुत्तंसवत् ॥ यथा स्रजि मालायां सिद्धायामुत्तंसः शेखरः सिध्यती
5 ति कोचिदनिबद्धमेव पर्यवसिता दृष्टान्तार्थमाह ॥ नानिबद्धं चकास्त्येकतेजः परमाणुवत् ॥ नैक
त्यनिबद्धं चकास्ति दीप्यते यथा एकतेजः परमाणुरिति ॥ अत्र श्लोकः ॥ असंकलितरूपा
णां काव्यानां नास्ति चारुता न प्रत्येकशः प्रकाशन्ते तेजसां परमाणवः ॥ ६ ॥ सन्दर्भेषु दशरूपकं श्रेयः ॥
सन्दर्भेषु प्रबन्धेषु दशरूपकं नाटकादि श्रेयः ॥ तस्मात्तद्धि चित्रं चित्रपटवद्विशेषसाकल्या ५
ते ॥ तद्दशरूपकं हि यस्माद्विचित्रं चित्रपटवद्विशेषसाकल्यात् ॥ ततोऽन्यभेदक्लृप्तिः ॥ ततो दशरूपका
दन्येषां भेदानां क्लृप्तिः कल्पनमिति दशरूपकस्यैवेदं विलसितम् ॥ यच्च कथाख्यायिके महाकाव्यमिति ॥
तल्लक्षणं च नातीव हृदयंगममित्युपेक्षितमस्माभिः तदन्यतो ग्राह्यमिति ॥ ॥ इति काव्यालंकार

सूत्रवृत्तौ शारीरे प्रथमेऽधिकरणे तृतीयोऽध्यायः॥ ३॥ काव्ययोगानि काव्यज्ञोपशोषाः॥ ॥समाप्तं चे
दं शारीरं प्रथममधिकरणं॥ ॥काव्यशरीरे व्यवस्थापिते काव्यसौंदर्याक्षेपहेतवस्त्यागाय दोषा
ज्ञातव्याः॥ इति दोषदर्शनं नामाधिकरणमारभ्यते॥ दोषस्वरूपकथनार्थमाह॥ गुणविपर्य
यात्मानो दोषाः॥ गुणानां वक्ष्यमाणानां ये विपर्ययास्तदात्मानो दोषाः॥ अर्थतस्तदवगमः॥ गुण
स्वरूपनिरूपणात्तेषां दोषाणामर्थादवगमोऽर्थसिद्धिः॥ किमर्थं तर्हि पृथक्प्रपंच इत्यत आ
ह॥ सौकर्याय प्रपंचः॥ सौकर्यार्थं प्रपंचो दोषाणां उद्दिष्टलक्षिता हि दोषाः सुज्ञाना भवंति॥
पददोषान् दर्शयितुमाह॥ दुष्टं पदमसाधु कष्टं ग्राम्यमप्रतीतमनर्थकं च॥ क्रमेण व्याख्या
तुमाह॥ शब्दस्मृतिविरुद्धमसाधु॥ शब्दस्मृत्या व्याकरणेन विरुद्धं पदं॥ यथा॥ अन्यकारक
वैयर्थ्यमिति॥ अत्र हि षष्ठ्याः तृतीयासमासस्यासमासात् गाश्रीरस्यापि स्थितो लघुकोति कारकेण गद्ध
११ नि ह्वं भवितव्यं॥ श्रुतिविरसं कष्टं॥ श्रुतिविरसमत्यन्तकटु पदं कष्टं॥ तद्धि रसनागुंफितमसुखं हि उपय
ति॥ यथा॥ अलंकुरुस्वेदिकपोलयोस्तोका निदर्शनविघात दग्रांशकः॥ लोकमात्रप्रयुक्तं ग्राम्यं॥

लोके ऽयं यत्प्रयुक्तं न शास्त्रे तद्ग्राम्यमप्यदम्॥ यथा॥ कष्टं कथं रोदिषि फूत्कृत्यते यतः। अन्यद
पि मद्भृंगगलादीति द्रष्टव्यं॥ शास्त्रमात्रप्रयुक्तमप्रतीतं। शास्त्र एव प्रयुक्तं न लोके तदप्रतीतपदम्॥ य
था॥ किमाषितेन बहुना रूपकस्कंदस्य संनिभेन गुणाः॥ गुणानां तूरीयकं च प्रमेति। नमस्त्वपा
6 लंभः। पूरणार्थमनर्थकं। पूरणमात्रप्रयोजनमव्ययं पदमनर्थकं। दंडापूपन्यायेन पदमन्य
दप्यनर्थकमेव॥ यथा॥ उद्धृतस्कहास्तिकविनोलमयंति मिरन्निपीयकिरणैः सवितः॥ अन्यत्तु
शब्दस्य पादपूरणार्थं एव प्रयोगः॥ नथा कालंकारार्थं॥ वाक्यालंकारप्रयोजनं नानर्थकं
अपवादार्थमिदं। नखाद्यदृगता मता नयनगोचरमागतति। संप्रति पदार्थदूषणमाह॥
अन्यार्थनेयगूढार्थश्लीलाश्लिष्टानि च॥ दुष्टपदमित्यनुवर्तते॥ अनर्थत्वं न चेन परिणा
मः॥ तेनान्यार्थनेयादीनि पदानि दुष्टानि॥ इति सूत्रार्थः॥ एषां क्रमेण लक्षणान्याह॥
रूढिच्युतमनर्थकं। रूढिच्युतं रूढिमनपेक्ष्य यौगिकार्थोपादानादन्यार्थपदं। स्वरूपतस्ता ६
त्सामान्येन घटशब्दः पटशब्दार्थे इत्यादिकमन्यार्थं न्तो कौ॥ यथा॥ तेदुःखमुद्भावहमाव

हंतिये प्रस्मरंतिश्रियसंगमानो॥ आवहतीति करोत्यर्थो धारणे प्रयुक्तः। प्रस्मरणवि
स्मरणार्थः। प्रकृष्टस्मरणार्थ इति। कल्पितार्थेन्नेयार्थो। अपदस्थो नार्थस्य केन्चनकल्पि
तार्थः॥ नेयार्थमिति॥ यथा॥ स यादृक्पंक्तिविहंगमानामभृन्नेमिनेयवलितं बलभ्राजिना॥
विपुलपर्वतवर्षिशितैः शरैः प्लवगसैन्यमुलूककडिताडितम्॥१॥ अत्र विहंगमश्चक्रवा
केऽभिप्रेतः॥ तन्नामानि चक्राणि तानि बिभ्रतीति विहंगनामभृन्नेमी रथाः॥ पंक्तिरिति
दशानसंख्यानेनलक्ष्यते। पंक्तिर्विशविहंगमानामभृत्। दशरथस्तत्तनयाभ्यां रा
मलक्ष्मणाभ्यां संवलितं प्लवगसैन्यं कडितं मुलूककडिताऽऽडिजिना कौशिकशब्देनेन्द्रो
लूकयोरभिधानमिति। कौशिकशब्दवाच्यत्वेनेन्द्र उलूक उक्तः। ननु चैवं रथांगनो
म्नोऽत्र योगोऽनुपपन्नः॥ न तेषां रूढिलक्षणत्वात्। अप्रसिद्धार्थप्रयुक्तं गूढार्थं।
यस्य पदस्य लोकेऽर्थः प्रसिद्धश्चाप्रसिद्धश्च तदप्रसिद्धेऽर्थे प्रयुक्तमप्रसिद्धार्थप्रयु
क्तं गूढार्थं॥ यथा॥ सहस्रगोरिवानीकं दुःसहं भवतः परैः॥ सहस्रगावो यस्य स सहस
अक्षीणि

हस्तगुरिं द्रस्तस्येवेति गोशाष्ट्रस्या क्षिता न काव्यं कविषयप्रसिद्धमिति ॥ असभ्या
र्थान्तरमसभ्यस्मृतिहेतुर्ष्याश्लीलं। यस्यपदस्यानेकार्थस्य कोऽर्थोऽभ्यस्या
7 न्तदसभ्यार्थान्तरं। यथा॥ वर्ज्यशनिपदेन्तेऽसिविषायां च॥ यत्तु पदमेकद्वारेण
सभ्यमर्थस्मारयन्नितरदसभ्यस्मृतिहेतुः॥ यथा॥ हूकराद्के ति। नयुग्गलाक्षि
७ तसंवृत्तानि। अपवादार्थमिदम्ग्राह्यलोक्षितसंवृत्तेनाश्लीलम्। एषां लक्ष ७
णान्याह। अप्रसिद्धसभ्ययुक्तं॥ अप्रसिद्धसभ्यार्थान्तरपदमप्रसिद्धसभ्य
युक्तं। यथा। संबाध इति पदम्। तद्धि प्रसिद्धसंकटार्थेन युक्तार्थमिति। लाक्ष
कसभ्यान्वितं लाक्षितं तदेवासभ्यार्थान्तरं। लाक्षणिकेनसभ्यार्थेनान्वितं प
दं लक्षितं। जन्मभूरिति। तद्धि लक्षणया गृहार्थेन्ते स्वचशकयति। लोकसंवी
सं वृतं। लोकेन संवीतं लोकसंवृतं। यत्तत्संवृतं॥ यथा॥ सुभग भगिन्युपस्था
नमभिप्रेतं कुमारीदोहदमिति। अत्र वक्तव्यः॥ संवीतस्य हि लोकेन दोषान्वेषप

परं ॥ शिवलिंगस्य संस्थाने कस्यासम्भाव्यभावना ॥ तत्रैव विदु व्रीडाजुगुप्सामंगला द्रीडा
तंकदायिभेदात् तत्रस्याश्लीलस्य त्रैविध्यं भवति । किंचिज्जुगुप्सादायी भवति ॥ यथा ॥ वाक्यो
टघाहरण्यरेता इति । किंचिज्जुगुप्सादायि भवति । यथा कपर्द इति । किंचिन्नगर तंकदायि
भवति । यथा । संस्थितमिति ॥ व्यवहितार्थप्रत्ययं क्लिष्टं । अर्थप्रतीतिरर्थप्रत्ययः सव्यवहि
तो यस्माद्भवति न च व्यवहितार्थप्रत्ययात् क्लिष्टं । यथा ॥ दक्षात्मजादयितवल्लभवेदिकानां ज्यो
त्स्नाजुषां जललवा सरलेपतन्ति ॥ दक्षात्मजास्तारास्तासां दयितश्चन्द्रस्तस्य वल्लभा खण्डकां
ताः तद्वेदिकानामिति । अत्र हि व्यवधानेनार्थप्रत्ययः । अरूढार्थमप्रतीतं । अरूढार्थत्वेपि यत्नोऽ
र्थप्रत्ययो झटिति भवति न तत् क्लिष्टं परं । यथा ॥ कोपीयुगस्यान मानिदि नायादिति । अत्राभ्या
याकर्यव्याख्यातं ॥ अश्लीलं क्लिष्टं वाक्येष्वपदेनाभ्यां वाक्यव्याख्याने तदप्यश्लीलं क्लिष्टं च भवति
अश्लीलं यथा ॥ न साधनो न्नीतियी स्याल्लक्षा नत्रसुखदायिनी ॥ परार्थवद्धकक्षाणां पतत्स्यप
न बन्धनो ॥ ६ ॥ सोपानपथमुत्सृज्य वायुवेगसमुद्भृतो ॥ महापथेन गतवान्कीर्त्यमानगुणोऽजनैः ॥

क्लिष्टं यथा ॥ धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरंगशावाक्ष्याः ॥ रज्यत्यपूर्वबन्धव्युत्पत्तेर्मा
नसं शोभाम् ॥ एतान्पदपदार्थदोषान्विमकान्वो । विस्यज्ञेऽह तितास्तयोऽर्थः ॥ ॥ इति काव्या
लंकारसूत्रवृत्तौ दोषदर्शने द्वितीयेऽधिकरणे प्रथमोऽध्यायः ॥१॥ ॥पदपदार्थदोषविभागः
॥ इदानीं वाक्यदोषान्निरूपयितुमाह ॥ भिन्नवृत्तयतिभ्रष्टविसंधीनि वाक्यानि ॥ दुष्टानीत्यभि
८ संबंधः ॥ तानि क्रमेण व्याचष्टे ॥ स्वलक्षणच्युतवृत्तं भिन्नवृत्तं ॥ तस्मिन्स्वलक्षणच्यु
तवृत्तं वाक्यं भिन्नवाक्यं ॥ यथा ॥ अपि पश्यसि सौधमाश्रितामविरलकुसुमनोमालभारिकाम्र.
4 वैतालीययुग्मपादेन ध्वक्षरगणापेक्षा नैरन्तर्येण भिद्यते । तदेतद्भिन्नवृत्तं । वि
रसविरामं यतिभ्रष्टं ॥ विरसः श्रुतिकटुर्विरामो यस्मिंस्तद्विरसविरामं यतिभ्रष्टं ॥ तद्धातुना
मभागभेदे स्वरसंधिकृते प्रायेण ॥ तद्यतिभ्रष्टं ॥ धातुभागभेदे नामभागभेदे च भवति भव
ति । स्वरसंधिनाकृतेन बाहुल्येन । धातुभागभेदे मन्दाक्रान्तायां ॥ यथा ॥ एतासां राजति सुमन
सां दाम कंठावलंबि । नामभागभेदे शिखरिण्यां ॥ कुरंगाक्षीणां गंडफलके स्वेदविरसः ॥ मं
दाक्रान्तायां । दुर्दर्शश्च क्षितिखि कपिधानः शार्ङ्गिणो बाहुदण्डः ॥ धातुनामभागपदग्रहणं त

मागानिरीक्ष्य भेदेन भवति यति भ्रष्टत्वं। शोभां पुष्यत्ययमभिनवः सुन्दरीणां प्रबोधः॥ वि-
भिन्ने श्यामा नेत्रपुष्परपुटचीत्कारविरुतैः॥ स्वरसन्ध्यकृते इति वचनात् स्वरसंधिकृते भेदेन दो-
षः। यथा॥ किं चित्रं वा तत्समसम सरलं चक्षिंत सुन्दरीणां॥ न च तद्दोषात्पृथग्यतिदोषे वृ-
त्तस्य यत्या स्मर्तव्यं। वृत्तदोष्वेव यतिदोषो न च लि[illegible]ो केयोऽर्थ तस्य यत्या लक्षणाद्यत्प-
कं छिद्र नाभिमतिभिन्नेऽपि तु एव यतिभ्रष्टत्वात भाव्यान्न पृथग्ग्रहणं कार्यमिति चेत् आह। न ल-
क्षणः पृथक्कारः॥ अन्याद्दृ लक्षणं वृत्तस्यान्य — त्। गुरुलघुनियमात्मकं वृत्तं विभागो वि-
च्छेदो यतिरिति॥ विरूपपदसंधिर्विसंधिः॥ पदानां संधिः पदसंधिः स च समवायरूपः। ग सा सं-
तिरूपो वा सरूपोऽस्मिन्निति विग्रहः॥ पदसंधेर्वैरूप्यं विश्लेषो अश्लीलत्वं वा। विश्लेषो विभागे-
न पदानां संस्थितिरिति। अश्लीलत्वं असभ्यस्मृतिहेतुत्वं कष्टत्वं पारुष्यमिति। मेघानिलेन
अमुना एकस्मिन् — कावने। कमले इव लोचने इमे अनुबध्नाति विलासपद्धतिः॥ लोला-
लकानु विद्युनि आननानि चकासति। अश्लीलत्वं यथा॥ विरेचकमिदं वृत्तं माचार्यो भ्यसमो-
जितां चकासेपनसप्रायेः पुरीखंडमहाद्रुमैः॥ विनाशाप पदानां यद्वा रम्यपदुल्लसुके कष्टत्वात् मे

अप्युद्भ्रमणमस्ति गुर्वी भोगाद्भुमावमुः। एवं वाक्यमै दोषानभिधाय यथा काव्यार्थदोषान्नि
रूपायितुमाह॥ अर्थैकार्थसंदिग्धयुक्तापक्रमलोकविद्याविरुद्धानि। वाक्यानि दुष्ट
नि तिसंबंधक्रमेण व्याख्यातुमाह। व्याहतपूर्वोत्तरार्थमर्थं व्याहतौ पूर्वोत्तरा
१ र्थौ यस्मिंस्तद्व्याहतपूर्वोत्तरार्थं। यथा॥ अद्यापि स्मरनिरसालसं मनो मे मुग्धा
याः स्मरचेष्टितानि। मुग्धा च तत्कथं स्मरचतुराणि चेष्टितानि। तानि च कथं मुग्धा
अत्र पूर्वोत्तरयोरर्थयोर्विरोधाद्व्याहतार्थं। उक्तार्थपदमेकार्थं। उक्तो यो निपदार्थो तेय
स्मिंस्तदुक्तार्थपदमेकार्थं। चित्तमोहमनङ्गसंगत्तेनुत्तेविप्रोक्षितसुमनकवे॥ अनङ्गश
ब्दस्य स्नो चित्तमोहात्मकत्वात्। चित्तमोहशब्दो प्रयुक्तोयेकार्थो भवतः। एकार्थ
पदत्वं वाक्यार्थमित्युक्तं। न विशेषणमितं। नगतोर्थं दृष्टविशेषणं च प्रतिपाद्यो भव
ति। न विशेषप्रतिपादयितुमाह। धनुर्ज्यध्वनौ धनुः श्रुतिरूढप्रतिपत्तौ। धनुर्ज्या

धानेना विसत्रज्याशब्देनोक्तार्थस्यापि धनुःश्रुतिः प्रयुज्यते। आरूढप्रतिपत्त्यै। आरोह
णस्य प्रतिपत्त्यर्थं नहि धनुःश्रुतिमन्तरेण धनुष्यारूढाऽज्या धनुर्ज्येति शब्दं प्रतिपत्तुं॥ यथा॥
धनुर्ज्याकिणशब्देन ह्रेषा विस्फुरितं तदेति॥ कर्णावतंसश्रवणकुण्डलशिरःशेखरेषु
कर्णादिनिर्देशः सन्निधेः॥ कर्णावतंसादिषु शब्देषु कर्णादयो नामवतंसपदेनैवोक्तार्था नान्नि
र्देशाः सन्निधेः प्रतिपत्त्यर्थमिति संबन्धः नहि कर्णादिनिर्देशमन्तरेण कर्णादिसन्निहितो
नामवतंसादीनां शक्यप्रतिपत्तिरिति॥ यथा॥ दोलाविशेषाविलासिनीनां कर्णावतंसाः
कलयन्ति कम्पं॥ नीलोत्पलं श्रवणकुण्डलमापतन्ति॥ आपीयमुखरस्रगाः शिरःशेखरशा
लिनः॥ मुक्ताहारशब्देन मुशब्दस्योक्तौ॥ मुक्ताहारशब्दे मुक्ताशब्दो हारशब्देनैव गतार्थः प्रयुज्यते॥
शुद्धप्रतिपत्त्यर्थमिति संबन्धः॥ शुद्धं नामान्यरत्नामिश्रितो नां मुक्तानां हारो मुक्ताहारः॥
यथा॥ प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः॥ मुक्ताहारेण लसता हसतीव स्तनद्वयं॥
पुष्पमालाशब्दे माला शब्देनैव गतार्थं पुष्पपदं प्रयुज्यते॥ उत्कर्षस्य प्रतिपत्त्यर्थं उत्कृष्टानां
पुष्पाणां माला पुष्पमालेति॥ यथा॥ प्रायशः पुष्पमालेव कन्यका कं न लोभयेत्॥ ननु

माला शब्दोऽन्यत्रापि दृश्यते। यथा॥ रत्नमाला शब्दमालेति सत्यां उपचरति प्रसु
प्रयोगः॥ निरूपपदो माला शब्दः पुष्परचनाविशेषमभिधत्ते। यथा करिकरभशब्दे
नकारकलभशब्दस्तद्रूपस्य॥ करिकलभशब्दे करिशब्दः कलभपदेन गतार्थः।
10 प्रयुज्यते॥ तद्रूपस्य प्रतिपत्यर्थमिति। करीश्रोठः कुंजरस्तद्रूपः कलभः करि
कलभ इति। यथा॥ स्पृशं करिकलभत्यंजेमवधत रूपापादिनि। विशेषणस्य च। वि
शेषणस्य च ज्ञातिपत्यर्थमुक्तार्थस्य प्रतिप्रयोगः। यथा॥ दृगादमधुरां वालां विश्रा
द्वस्रवशालिनी॥ तदिदं प्रयुक्तेषु। नहि दृश्यमुक्तेप्रयुक्तेषु नाप्रयुक्तेषु॥ नहि भवति य
था। श्रवणकुंडलमिति। तथा नितंवकांचीत्यादि॥ यथा॥ करिकलभ इति। तथोष्ट्रक १०
लभ इति। तत्र श्लोकः॥ कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितः॥ संनिधानादिवोधा
र्थे स्थितेष्वेतत्समर्थनं॥ संशयकृत्संदिग्धं। यद्युक्तौ साधारणानां धर्माणां कृतौ वशि
ष्टानां च अकृते संशयं करोति नत्संशयकृत्संदिग्धं। स महात्मा भाग्यवशान्माहपदमुपा

।यथा।४

गतः॥ किं भाग्यवशान्महत्पदमुपागतः। आहोस्विदभाग्यवशान्महतीमापदमिति। संशय
स्य कथं प्रकरणाद्यभावे सतीति॥ मायादिकल्पितमयुक्तं॥ मायादिकल्पितो ऽर्थो यस्मिंस्त
न्मायादिकल्पितार्थमयुक्तं॥ अत्र श्लोक उदाहरणं॥ क्रमहीनार्थमक्रमं॥ उद्देशिनामनु
द्देशिनां च क्रमः सवथास्तेन विहीनो ऽर्थो यस्मिंस्तत् क्रमहीनार्थमक्रमं॥ यथा॥ कीर्तिप्रता
पौ भवतः सूर्येन्दुसमौ समौ॥ अत्र कीर्तिश्चन्द्रसमा न्यायेन प्रतापः सूर्यस्य तुल्यः सूर्यस्याग्रे
निपातादपक्रमः॥ अथवा प्रधानस्यार्थस्य पूर्वं निर्देशः क्रमस्तेन हीनो ऽर्थो यस्मिंस्तदपक्र
मं॥ यथा॥ तुरंगमथ मातंगं प्रयच्छास्मै मदालसं॥ देशकालविरुद्धानि लोकविरुद्धानि।
देशकालस्वभावैर्विरुद्धो ऽर्थो येषु तानि देशकालस्वभावविरुद्धानि॥ अर्थद्वारेण लोकवि
रुद्धत्वकथनं॥ देशविरुद्धं यथा॥ सौवीरेष्वस्ति नगरी मथुरा नाम विश्रुता॥ अक्षोटनारि
केराढ्यास्तस्याः पर्यन्तभूमयः॥ कालविरुद्धं यथा॥ कदम्बकुसुमस्मेरं मधौ वनमशोभत॥
स्वभावविरुद्धं यथा॥ मत्तालसंगमुखरामु चमेजरीषु सप्तच्छदस्य तरोरतिवशा रमन्तु स्वभ्री॥ सप्त
च्छदस्य स्तवका भवन्ति न मंजर्यः॥ इति स्वभावविरुद्धं॥ तथा॥ भंगो नक्कलिकाको ग्रस्तथा भृशमपि

गमना। कलाशास्त्रेश्चतुर्वर्गशास्त्रेश्च विरुद्धोर्थो येषु तानि कलाचतुर्वर्गशास्त्रविरुद्धानि।२

लंकार २

ज्यते। यथा गोष्ठपुरे हि ववर्ष बहुलं मधु॥ कलिकापांमकरंदस्यैव याहुल्यं स्वभावविरुद्धं

कलाचतुर्वर्गशास्त्रविरुद्धानि विद्याविरुद्धानि॥ विद्याविरुद्धानि वाक्यानां च विरुद्धार्थो

द्धारकः॥ कलाशास्त्रविरुद्धं यथा॥ कालिंगे नरविनामिदं चयस्य पत्रे पत्रैर्द्विरेफानितकोटिकं

टकोग्रं॥ कालिंगपातिताग्रकोटिकंटकमिति पत्रविदारणाय॥ तद्विरुद्धं कलाशास्त्रविरुद्धं।

।। एवं कलांतरेष्वपि विरोधोन्नेयः। चतुर्वर्गशास्त्रविरुद्धानि तत्र हि यते॥ कामोपभोगसाफ

ल्यफलो राज्ञां महीजयः॥ धर्मे फलोऽश्वमेधादि यज्ञः फलो वा राज्ञो महीजयस्तद्विरोधाद्धर्मशा

स्त्रविरुद्धं वाक्यं॥ अहङ्कारेणाजीयते द्विषंतः किन्नं श्रिया॥ द्विषज्जयस्य नृपस्य लर्लीस्थितं

दंडनीतौ॥ तद्विरोधादर्थशास्त्रविरुद्धार्थो। दशानां कपवित्रितोत्तरोष्ठे रतिखेदालसमाननं का

रामि॥ उत्तरोष्ठमंतर्मुखैवं नयनांतमितिमुखो चुंबनं नखरदशनस्थानानीति कामशास्त्रे स्थितं॥

तद्विरोधात्कामशास्त्रविरुद्धं वाक्यमिति॥ देवदत्तस्य भक्तितो मुक्तिर्न तत्त्वज्ञानसंपदा॥ एतस्य

शास्त्रस्य मोक्षशास्त्रे स्थितं तत्त्वं तद्विरुद्धार्थे॥ एतेनान्यवाक्यार्थदोषाः स्या गायद्योतव्याः॥ अन्ये ११

च येशाद्वार्थदोषाः सूक्ष्मास्तेषां एणविवेचनं यथ वक्ष्यते॥ उपमादोषाश्चोपमाविचारे इति॥ ॥इति

काव्यालंकारसूत्रवृत्तौ दोषदर्शने द्वितीयेऽधिकरणे द्वितीयोऽध्यायः ॥२॥ वाक्यवाक्यार्थदो
षविभागः । समाप्तं चेदं दोषदर्शनं द्वितीयमधिकरणमिति ॥ यद्विपर्ययात्मानो दोषास्तान्गुणान्
विचारयितुं गुणविवेचनमधिकरणमारभ्यते । ओजःप्रसादादयो गुणा यमकोपमादयः
स्त्वलंकारा इति स्थितिः ॥ काव्यविदां तेषां किं भेदनिबन्धनमित्याह ॥ काव्यशोभायाः कर्त्तारो ध
र्मा गुणाः ॥ ये खलु शब्दार्थयोर्धर्माः काव्यशोभां कुर्वन्ति ते गुणाः । ते चौजःप्रसादादयः । न यम
कोपमादयः । कैवल्ये न तेषां काव्यशोभायाः कर्तृत्वात् ॥ ओजःप्रसादादीनां तु केवलानामस्ति
शोभाकारित्वमिति ॥ तदतिशयहेतवस्त्वलंकाराः ॥ तस्याः शोभाया अतिशयस्तदतिशयस्तस्य हे
तवस्त्वलंकाराः ॥ तुशब्दो व्यतिरेके । अलंकारश्च यमकोपमादयः । अत्र श्लोकौ ॥ युवतेरिव रूपम
ङ्ग काव्यं स्वदते शुद्धगुणं तदतीव । विहितप्रणयं निरन्तराभिः सदलंकारविकल्पकल्पनाभिः ॥१॥
यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः ॥ अपि जनदयितानि दुर्भगत्वं नियतम
लंकरणानि संश्रयन्ते ॥२॥ पूर्वे नित्याः । पूर्वे गुणा नित्याः ॥ तैर्विना काव्यशोभानुपपत्तेः ॥ एवं गु
णालंकाराणां भेदं दर्शयित्वा शब्दगुणान्निरूपयितुमाह ॥ ओजःप्रसादश्लेषसमतासमाधिमा

धुर्यसौकुमार्योदारतार्थव्यक्तिकांतयोबंधगुणाः। बंधः पदरचना तस्यागुणाबंधगुणाः॥ओजः
प्रसादयः॥नानेवेक्रमणादर्शयितुमाह॥गाढबंधत्वमोजः॥बंधस्यगाढत्वं[illegible]जः॥यथा॥विलु
लितमकरंदामंजरीनर्तयंती नपुनर्विलुलितमकरंदमंजरीर्नर्तयंति॥शैथिल्यंप्रसादः॥
बंधश्लेथित्यंशिथिलत्वंप्रसादः॥नत्वयमोजोविपर्ययात्मासदोषस्तत्कथंगुणइत्याह॥
गुणसंप्लवात॥गुणात्प्रसादपारोजसासहसंप्लवात॥नशुद्धः॥शुद्धस्तुगुणादोषएवेति॥
ननुविरुद्धयोरोजःप्रसादयोःकथंसंप्लवइत्याह॥सत्वनुभवसिद्धः॥संतुसंप्लवोनुभ
वसिद्धस्तद्विदांरत्नादिविशेषवत॥अत्रश्लोकाः॥करुणप्रेक्षणीयेषुसंप्लवःसुखदुःखयोः।
यथानुभवतःसिद्धस्तथैवौजःप्रसादयोः॥साम्यमुत्कर्षवत॥साम्यमुत्कर्षवोजःप्रसादेअनु
भवादेवासाम्यंयथा॥अथसविषयप्रत्याहतानामयथाविधिसृनवेन्दपानिकुकुरंदत्वापूनेसि
तातपवारणी॥क्वचिदोजःप्रसादउत्कृष्टं॥वेजतिगगनेभृङ्गीनतकापकेनसहोपमा॥क्व १२
चिदोजःप्रसादस्योत्कर्षः॥कुसुमशयनेनप्रत्ययानचेंदुमरीचयोनचमलयजसर्वांगीनतवाम
शीम्नमयः॥मसृणत्वंश्लेषः॥यस्मिन्सतिबहून्यपिपदान्येकवद्भासंते॥यथा॥अस्त्युत्तरस्यां

दिशि देवतात्मा हिमालयो नाम नगाधिराजः॥ न पुनः॥ स्तरन्नेज्ञोत्तमरः स्यन्नेभ्रम
री वल्गुगानमुखैः॥ नेडितकालिलमाकाशमिति। एवं कृतेनेषापि॥ व्रजन्स्तत्र मुरस्य लेभ्र
मरीमंजुगीतयः॥ नेडितृरिलमाकाशमिति॥ मार्गभेदः समता॥ मार्गस्याभेदः समता
येन मार्गेणोपक्रमस्तस्यात्याग इत्यर्थः॥ श्लोकेष्वथं द्येवेति॥ अस्त्युत्तरस्यामित्यादिरि
वोक्तमुदाहरणम्॥ विपर्ययस्तु यथा॥ प्रसीद चण्डि त्यज मन्युमंजसा जनस्तवायं पुरतः
कृताञ्जलिः॥ किमर्थमुत्कम्पितपीवरस्तनद्वयं त्वया लुप्तविलासमास्यते॥ आरोहाव
रोहक्रमः समाधिः॥ आरोहावरोहावारोहपरः क्रमः आरोहावरोहक्रमः समाधिः॥ प
रिहारः आरोहस्यावरोहे सति। आरोहपूर्वो अवरोहो यथा। निरानंदः कौन्दे मधुनि परि
भुक्तोज्झितरसो। अवरोहपूर्वस्त्वारोहो यथा नराधीशो भ्रष्टाश्रयसनइवमज्जो निमर
वः॥ आरोहस्य क्रमो अवरोहस्य च क्रमः क्रमेणावरोहावरोहणौ वेति कश्चिन्न्याय यथानि
वेशः स्वःसिंधोस्तुहिनगिरिवीथ्यां विजयते ततो न पृथ्वीगोरोहावरोहयोरागः प्रसादरूपत्वा
न्न पृथक् समाधिर्गुणः॥ आरोहावरोहयो रागः प्रसादरूपत्वात्। ओजो रूप आरोहः प्रसा

दरूपस्त्ववरोहइति। नसंप्लवेकत्वात्। यदुक्तमोजःप्रसादयोरद्धिध्रुवः। द्वयोरिति॥ तत्तत्संप्ल
केरूपत्वात्। संप्लवो स्वल्वोजःप्रसादौ नदीवेणिकावदुद्वहतः॥ अनेकान्ताच्च॥ न चाय
मेकान्तो यदोजस्यारोहः प्रसादे चावरोह इति॥ ओजःप्रसादयोस्तीव्रावस्था काचिदिति चेदभ्युपग
मः॥ ओजःप्रसादयोः क्वचित्तु तीव्रावस्थावरोहारव्येति। एवं चेन्नान्यसेदभ्युपगमो नावप्र
तिपत्तिः॥ विशेषापेक्षत्वात्तयोः। स चाविशेषो गुणानामेवायरोहावरोहनिमित्तं समाधि
राख्यायते। आरोहावरोहक्रमः समाधिरिति गौण्या वृत्त्या व्याख्येयं। क्रमविधानार्थत्वात्पृ
थक्करणमिति। पाठधर्मत्वं च न संभवति। न पाठधर्माः सर्वत्रादृष्टेरित्येव वयस्याम॥ पृ
थक्पदत्वं माधुर्यं। बंधस्य पृथक्पदत्वं यत्तन्माधुर्यं पृथक्पदानि यस्य स पृथक्पदस्त
स्य भावः॥ पृथक्पदः समासदैर्घ्यनिवृत्तिपरं चैतत्॥ पूर्वोमुदाहरणं॥ विपर्ययस्तु यथा॥
चलितशबरसेनादत्तगोशृंगचंडध्वानचकितवराहव्याकुला विंध्यपादाः॥ अत्र रठत्वं सौ
कुमार्यं॥ बंधस्याजरठत्वमपारुष्यं यत्तत्सौकुमार्यं। पूर्वोक्तमुदाहरणं। विपर्ययस्तु पाधीन
दनोनिद्धेनाश्रियजे नमुद्द्कूलयवासितः सुधासकलीषोफलमापिविरूद्धमनमहाद्रि॥ विक
टत्वमुदारता। बंधस्य विकटत्वं यदसावुदारता यस्मिन्सति नृत्यन्तीव पदानीति जनस्य ९२

वर्णोभावनातद्विरुवत्नौलायमानत्वमित्यर्थः॥ यथा। स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां
झटितिरणितमासीन्मंजु चित्रं च तत्र॥ अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः॥ यत्र झटित्यर्थप्रतिप
त्तिहेतुत्वं स गुणोऽर्थव्यक्तिरिति॥ पूर्वमुदाहरणं प्रत्युदाहरणं भूयः सुलभम्। अम्भोजस्यकौ
ति॥ वर्चस्योद्वन्नत्वं नामास्तोकान्तिरिति॥ यद्भावे पुराणच्छायेत्युच्यते। यथा कुरंगीनेत्राअस
वकितनवनालीपरिसरः॥ विपर्ययस्तु भूयान्स्तु तन्मध्ये॥ म्लोकोभ्का त्रमर्यादि॥ पदन्यासस्वपगात्
वं वर्द्धसोऽज। कवीश्वराः॥ अनेनाधिष्ठिताः प्रायः शब्दाश्चात्र रसायनाः॥ १॥ म्लनपत्वमोजसामितं
प्रसादं वेश्मवक्षसे॥ अनेन नवितासमाकुलं दन्तेकाव्यपद्धतिः॥ २॥ यत्रैकपदवद्भावः पदानां भू
यसामपि॥ अनालक्षितसंधीनां स श्लेषः परमो गुणः॥ ३॥ प्रतिपादं प्रतिश्लोकमेकमार्गपरि
ग्रहः॥ दुर्बन्धो दुर्विभावश्च समतेति मतो गुणः॥ ४॥ आरोहत्यवरोहन्ति क्रमेण पततो हि तत्॥
समाधिर्नाम सगुणस्तेन पूतो सरस्वती॥ ५॥ वंधे पृथक्पदत्वं च माधुर्यमुदितो बुधैः॥ अनेनहि
पदन्यासाः कामधारा मधुच्युतः॥ ६॥ यथाधिरोहणेरेखा वेतुरंध्रत्रयं पदे॥ नेपथ्ये वाग्मीः प्राद्वैसमे

मसृणगुणगुंफिता ||७|| बंधस्याजरठत्वं च सौकुमार्यमुदाहृतं || एनेन वर्जिता वाचो रूक्षत्वान्न
क्षमाः तिक्षामाः ||८|| विकटत्वं हि बंधस्य कथयंतीह्युदारतां || वैचित्र्यं नृत्यपद्धते यथा यान्त्या
पदक्रमाः ||९|| पश्चाद्द्रुतगतिर्वाचः पुरस्तादिव वस्तुनः || यत्रार्थव्यक्तिहेतुत्वात्सोऽर्थव्यक्तिः स्मृ
तो गुणः ||१०|| औज्ज्वल्यं कान्तिरित्याहुर्गुणं गुणविशारदाः || पुराणचित्रस्थानीयं तेन वं
ध्यं कवेर्वचः ||११|| नासन्तः संवेद्यत्वात् || न खल्वेते गुणा असन्तः संवेद्यत्वात्तेषां द्विसमाः
संवेद्यत्वेऽपि भ्रान्ताः स्युरित्याह || न भ्रान्ता निःकंपत्वात् || न गुणा भ्रान्ता एतद्दूषयायाः प्र
तीतेर्निःकंपत्वात् || न पाठधर्माः सर्वत्रादृष्टेः || नैते गुणाः पाठधर्माः सर्वत्रादृष्टेः | यदि
पाठधर्माः स्युर्विशेषणापेक्षाः सर्वत्र दृश्येरन् || न च सर्वत्र दृश्यन्ते विशेषणापेक्षया
विशेषणानां गुणत्वाभ्युपगम एवेति || ||इति श्रीकाव्यालंकारसूत्रवृत्तौ गुणविवेच १४
ने तृतीयेऽधिकरणे प्रथमोऽध्यायः || ||गुणालंकारगुणविवेकः शब्दगुणविवेकश्च
|| ||संप्रत्यर्थगुणविवेकार्थमाह || त एवार्थगुणाः || त एव ओजःप्रभृतयोऽर्थगुणाः शब्दार्थ

गुणानां वाच्यया चकदूरेण भेदं दर्शयति। अर्थस्य प्रौढिरोजः॥ अर्थस्याभिधेयस्य प्रौढि
त्वं तदोजः॥ पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा॥ प्रौढिर्व्याससमासौ च साभिप्रायत्वम
स्य च॥ पदार्थे वाक्यरचनं यथा॥ अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः॥ अत्र चंद्रपदवाच्येऽर्थे
नयनसमुत्थं ज्योतिरिति वाक्यं प्रयुक्तं। पदसमूहश्च वाक्यमभिप्रेतम्॥ अनया दिशान्यदपि द्र
ष्टव्यं॥ तद्यथा॥ पुरः पांडुच्छायं तदनु कपिलिम्ना कृतपदं ततः पाकोत्सेकादरुणगुणसंसर्गित
वपुः॥ म्लाने शोषारंभे स्थपुटनिजविष्कंभविषमं वने वीतामोदं बदरमरसत्वं कलयति॥ न चैवमति
प्रसंगः॥ काव्यशोभाकरत्वस्य गुणस्य सामान्यस्य लक्षणस्यात्रस्थितत्वात्॥ वाक्यार्थे पदाभिधानं
यथा। दृश्यपेन न भवति किंतु मानुषीति कर्तव्ये निमिषतीत्याहेति। अस्य च वाक्यस्य व्याससमासो
~~ ~~ व्याकरणस्य व्यासो यथा॥ अयं नानाकारो भवति सुखदुःखव्यतिकरः सुखं वा दुःखं वा भ
वति न भवत्येव चेतनः॥ पुनस्तस्मादूर्ध्वं भवति सुखदुःखं किमपि तत्पुनस्तस्मादूर्ध्वं भवति न च दु
खं न च सुखं॥ समासो यथा॥ ते हिमालयमामंत्र्य पुनः प्रेक्ष्य च शूलिनं॥ सिद्धं चास्मै निवेद्या
र्थं तद्विसृष्टाः खमुद्ययुः॥ साभिप्रायत्वं यथा॥ सोयं संप्रति चंद्रगुप्ततनयश्चन्द्रप्रकाशो युवा जातो भू

15

पभिराक्रमः केनचियां दिष्ट्या कृतार्थक्रमः । आक्रमः कृतधियामिसस्यवधवस्कसाचियो पक्षो
पपरस्या सामिप्रायत्वं ॥ एतेन । रतिविगलितबंधे केशपाशे सुकेश्याः सस्यबन्धकेशपाशस्य सा
भिप्रायत्वं व्याख्यातं ॥ अर्थवैमल्यं प्रसादः ॥ अर्थस्य वैमल्यं प्रयोजकमात्रपरिग्रहः प्रसादः इति
स यथा कन्यकारूपयौवनशालिनीति ॥ विपर्ययस्तु । उपास्तां हस्तो मे विमलमणिकाञ्चीपदमिदं ॥
काञ्चीपदमिह सन्नेनैव नितम्बस्थलं लक्षितं सा हि विशेषणस्याप्रयोजकत्वं ॥ घटनाश्लेषः ॥ क्रमकौटिल्या
नुल्बणत्वोपपत्तियोगो घटनाश्लेषः ॥ यथा ॥ दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरादेकस्या
नयने निमील्य विहितक्रीडानुबन्धच्छलः ॥ ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसामन्त
र्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥ १ ॥ मसृणकठिनाद्यवयवेषु प्रबन्धेषु स्वभूयान्यपव
हति ॥ अवैषम्यं समता ॥ अवैषम्यं क्रमाभेदः समता ॥ क्वचिच्च क्रमो भिद्यते ॥ यथा ॥ च्युतसुमन
सः कुन्दाः पुष्पोद्गमेष्वलसा द्रुमा मलयमरुतः सर्पन्तीमे वियुक्तधृतिच्छिदः ॥ अथ च वसति वक्त्रःसा
तो ग्रीष्मः स्तनेतिमरीचयो न च जरठतामालम्बन्ते क्रमोद्यदुदायिनी ॥ अत्र तु संधिप्रतिपादनपरे १५
द्वितीये पादे क्रमभेदे मलयमरुतामसाधारणत्वात् ॥ एवं त्रयोदशीयः पादः कर्तव्यः ॥

अर्थस्य दर्शनमर्थ्यात्। श्रेः समाधिः॥२

मनोसिजशिरंवध्यतीमकिरातेनकोनाइति॥सुमनत्वंवावेषम्याति॥यथा॥केशमवगुंठन
वतीनानिमस्फुरच्छारीरत्नावेएयामध्येतपोध्यनोनोकिसत्नयामिवपाडुपत्राणा।सुखसम
ताइयगम्यतेशायनेइत्यर्थः॥अस्त्युत्तरस्यामित्यादिप्रत्युदाहरणंसूत्रमं॥अर्थदृष्टिः
समाधिः।समाधिकरणात्समाधिः॥अवहितंतुविज्ञमर्थान्वेषणतीत्युक्तं॥आकूः
अर्थोद्विविधोयोनिरन्यछायायोनिर्यो॥अयोनिरन्यकारणोऽवधानमात्रकारणइत्य
र्थः।अन्यस्यकाव्यस्यछायायाअन्यछायायातद्योनिर्यो॥अयोनिरनन्यकारणोऽवैनमो धा६
कारणइत्यर्थः॥अन्यस्यकाव्यस्यछायायाअन्यछायायातद्योनिर्यो॥तद्यथा॥आस्वपोहम
नसीधुभाजनाद्याववदनदृशानेनेदृशपसे।चंद्रमदृशानमेऽलोडितःखलयास्यासिहिर
हिणीमयाद्य॥माभैःशशांकेममसीधुनिनास्तिराहुःखेरोहिणीवसतिकातरकिंवि
भेषि॥आयोविदग्धवनितानवसंगमेषुपुंसामनप्रवेशतीवकिमत्रचित्रं॥पूर्वश्लोकम
र्थयोनिः॥द्वितीयस्यचछायायोनिरिति॥अर्थोव्यक्तःसूक्ष्मश्च॥यस्यार्थस्यचदर्शी
नसमाधिरिति।सद्विधा॥व्यक्तःसूक्ष्मश्च॥व्यक्तस्फुटउदाहृतएव॥सूक्ष्मंतुव्याख्यानं

हा हा स्तु इमो भाव्यो वासनीयम्॥ श्रीधुम्निरूपलोलाम्पोभय्यः॥ एकाग्रताप्रकर्षग
म्यो वासनीयमिति। भाव्यो यथा॥ अन्योऽन्यसेमि। लिनमां सस्त्रवैदने क्वांति सेधुलास
मा विरत्नसेवत्नि ताग्रतारं॥ ली ला ग्रहे प्रातिकूलं किलवि। वितेषु व्याव त्रै मानोमिथुने
विनयं चकास्ति॥१॥ वासनीयो यथा॥ अपवासित्यचालितउघनं विवर्तितो भिमुखकुवं
तटं स्थिता॥ अवलोकितो हमनया दक्षिणाकेलितहारस्तान नटे॥ उक्ते वैचित्र्यं माधु
र्ये॥ ७ के वैचित्र्यं यत्र तन्माधुर्यं॥ यथा॥ रसवेदमतेकः संदेहो मधुरन्यापि नान्यथा मे
धुरमधिकं वै तस्यापि प्रसन्नारसफलं॥ सकृदपि पुनर्मध्यस्यास्य स्वरसं तरवि ऊनो
ददनु यदि हान्यैत्स्वादुस्या ति। त्रियारदनेश्रुवोतं॥ अपारुष्यसौकुमार्यं। अपारुष्याद
न्येषु पारुष्यं सौकुमार्यं॥ यथा॥ तेन यद्वाशेषमित्याहुः॥ एका॥ केनैव नाहृनीयं ग
नि सोधयोति॥ ग्राम्यत्वमुदारता॥ ग्राम्यत्वत्रसंगे ग्राम्यत्वमुदारता॥ यथा॥ लोकेषु सो ९९
दर्यासमरूविनोयाः परिचितः कलानां स्त्रीसीमान्नपरामिह युवामेय भजेम॥१॥ अपि हृद
दिस्यानददिदर्भिति सुभगे समयति या मतः श्रोणं चेत्स्या ऊनामिहतदानीग्लानया॥

विपर्ययस्त्व। स्वापिमि यावदयं भिक्षो मनः स्वापिमि तावदहं किमप्येति ते॥ इति निगद्य पत्नी मे र
मे खलं मम करं स्वकरेण रुद्धा सा॥ वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः॥ वस्तुनो भावो नाम स्व
भावस्फुटत्वं यत् तदसावर्थव्यक्तिः॥ यथा॥ दृष्टेषु शंखधवलेषु विष्वक्षुद्रनोराजीभि
रंकितं तमालकफलोहितोभिः॥ गोरोचना हरितवल्कलहितपत्नी श्यामामोदितकुमुदमभसि प
ल्वलस्य॥ यथा वा॥ प्रथमममलसेपर्यस्ताग्रैः स्थितपृथुकैसरैर्विरलविरलैरंतःपत्रै
मनाङ्मिलितं नते॥ तेदट्टं वलं ना मार्गं किंचिद्धधापि विहितं लौट्टकुरलं नलिं बो प्रकु
श्रीभीवमूत्वकुरुद्धर्थना॥ दीप्तरसकत्वं कांतिः॥ दीप्तरसाः शृंगारादयो यस्य स दीप्त
रसस्तस्य भावो दीप्तरसत्वं कांतिः॥ यथा॥ प्रेयान्सायमपाकृतः सशपथं पादानतः
तया द्विश्रा एव पदानि वासभवनाद्यावन्नायात्युन्मनाः॥ तावत्प्रत्युतपाणिसंपु
टे सोन्नीवीनिवंधं ध्रुतो धावित्येव कृतप्रणामकमहो प्रेम्णा विचित्रा गतिः॥ उदा
धैरसातरेषप्युदहर्थे॥ अत्र श्लोकाः॥ गुणस्फुटत्वसाकल्यं काव्यपाकं प्रचक्षते॥
चूतस्य परिणामेन स चायमुपमीयते॥ १॥ सुप्तिङ्संस्कारमात्रं यत्रव्युत्पत्तिरेव सा

गुणं भवेत् ॥ काव्यं वृन्ताकपाकं तज्जुगुप्सन्ते जनास्ततः ॥२॥ गुणानां दशानामस्तनो यस्यार्थस्त
यामना त्वार्थपकम् ॥ दाडिमामिदत्रास्वादिनो विचारक्षमेवद्यः ॥३॥ ॥ इति काव्यालंकारसूत्रवृत्तौ गु
णविवेचने द्वितीयोऽध्यायः ॥ ॥ अर्थगुणविवेकं समाप्तं चेदं तृतीयमधिकरणं ॥ गुणान्निरूप्या
काव्यशोभातत्स्वअतिशयहेतवोऽलंकाराः ॥ तन्निरूपणार्थमालंकारिकमधिकरणमार
17 भ्यते ॥ तत्र शब्दालंकारौ द्वौ यमकानुप्रासौ क्रमेण दर्शयितुमाह ॥ पदमनेकार्थमक्षरं वावृत्तं
स्थाननियमे यमकं ॥ आवृत्तं शब्दः प्रत्येकमभिसंबध्यते ॥ पदमनेकार्थं भिन्नार्थमेकमनेकं
के वा ॥ तदुद्धारमाहृतं स्थाननियमे सति यमकं ॥ स्वरस्यामतानी येनवाकास्त्री कदक्षाम्या
मनेकपादव्याप्तिः स्थाननियम इति ॥ यानित्वे रूपदमावर्त्तनी नियमको निदर्शयतेन भुंगलाको
तरस्यसे स्थानयमकापेक्षेय स्थाननियम इति ॥ स्थानकल्पनार्थमाह ॥ पादः पादस्यैकाने १७
कस्य वादिमध्यान्तभागाः स्थानानि ।

श्रीगणेशाय नमः ॥ संप्रत्युपमाप्रपंचो निरूप्यते ॥ ज्वलितवस्तुप्रस्तुपमाप्रपंचः ॥ उपमेयस्यानुक्तौ समा
नवस्तुन्यासः प्रतिवस्तु ॥ अनुक्तौ समासोक्तिः ॥ उपमेयस्यानुक्तौ समासोक्तिः ॥ यथा ॥ श्लाघ्याध्वस्ता
ध्वगग्लानैः करीरस्य मरौ स्थितिः ॥ धिग्मेरौ कल्पवृक्षाणामनुत्पन्नार्थिनाश्रयः ॥ समेन वस्तुना
न्यापन्नापायापह्नुतिः ॥ यथा ॥ न केतकीनां विलसति रूवयः प्रवासिनो हृत्तरूस्य परिधिः ॥ माधिस्य
तेयं नवकालिं वंचलापुरः स्मरज्योतिरियं प्रवर्तते ॥ उपमानोपमेययोर्गुण साम्यात्तत्यारोपो रूप
कं ॥ यथा ॥ इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोरसावस्याः स्पर्शो वपुषि बहलश्चंदनरसः ॥ अयं
कंठे बाहुः शिशिरमसृणो मौक्तिकसरः किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ ३ ॥ सधर्मेण तन्त्र
प्रयोगश्लेषः ॥ उपमानोपमेयधर्मेषु तत्त्वारोपेन त्रयप्रयोगे नैरूप्यारोपे सति श्लेषः ॥ यथा ॥ श्री ह
शामन्तमेडन्नाग्ररूचवयः सन्नाकुवक्षस्स्थलो सोफाणे श्रोणिनो विपक्षहृदयक्षोभाधिनः कर्कशाः ॥ ३
हृन्नागुरवयक्षयस्य शामिनः ग्रामायमानाननापाधामारद्धुस्तनास्तनोभ्रुनेदभुः क्षोमाशयाजेन ॥ ४ ॥
सादृश्यलक्षणाभ्यक्तौ क्तिः ॥ यथा ॥ उन्मिमीलकमलं सरसीनां कैरवं च निमिमील मुहूर्तं ॥ ५ ॥ अत
रूपस्याऽन्यथाध्यवसाने मतिभ्रमायार्येनुस्येस्ता ॥ यथा ॥ सनः पायाद्द्दुः नंदविसन्नताकोटिकुन्तः स्मरद्वेषी
रू

मृष्टिर्यस्य न नकपिशो भाति निहितः॥ स्यवन्मं दाक्षिण्याः प्रतिदिशति कैन पयसा कपालेनोन्मृष्टः स्फ
टिकधवलेनाङ्कुरद्व॥६॥ संभाव्यधर्मतदुत्कर्षकल्पनाऽतिशयोक्तिः॥ यथा॥ उभौ यदि व्योम्नि
पृथक्प्रवाहावाकाशगङ्गापयसः पतेतां॥ तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य व
क्षः॥७॥ उपमानोपमेयसंशयः संदेहः॥ यथा॥ इदं कर्णोत्पलं चक्षुरिदं चेति जिते विभ्रमे
18 निश्चिनोति न मे स्वान्तं किन्तु दोलायते मनः॥ विरोधाभासत्वं विरोधः॥ यथा॥ सा बाला वय
मप्रगल्भमनसः सा स्त्री वयं कातराः सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयं॥ सा क्रान्ता
जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतं॥८॥
क्रियाप्रतिषेधे फलव्यक्तिर्विभावना॥ यथा॥ [illegible]सङ्गं न साहित्यमेवस्त्येव च वैकृतं॥
अक्षालितविशुद्धेषु हृदयेषु मनीषिणाम्॥१०॥ एकस्योपमानत्वेउपमेयत्वे चानन्वयः॥
गगनं गगनाकारं सागरः सागरोपमः॥ रामरावणयोर्युद्धं रामरावणयोरिव॥११॥ क्र
मेणोपमेयोपमा॥ एकस्यैवार्थस्योपमेयत्वमुपमानत्वं च क्रमेणोपमेयोपमा॥ यथा॥ खमिव जलं
जलमिव खं हंसश्चन्द्र इव हंससदृशश्चन्द्रः॥ कुमुदाकारास्तारास्ताराकाराणि कुमुदानि॥१२॥ सम

विसदृश्याभ्यां परिवर्त्तेन परिहृतिः ॥ यथा ॥ विपत्सा हारमह्यर्थे निश्चया विलोलनदृष्टिश्च विस्मृ
त चेत्तनां वयंध्वान्तारुणयम्भोवन्ध्येकलेपयोधरे सैवावि श्रीर्णा सेहति ॥१३॥ उपमेयोपमा
नानां क्रमनिर्बंधः क्रमः ॥ यथा ॥ तस्मात्त्रयं कुर्वन्नीत्वा मित्रां नापरिमनते वैचित्र्यभिः ॥ जीयंते यशो
कीर्तिः कुंदकुमुदेंदीवरस्रजः ॥१४॥ उपमानोपमेयैका क्रियादीपकं ॥ यथा ॥ नत्रिविधं ॥ आ
दिमध्यान्तवाक्यभेदात् ॥ यथा ॥ पुष्यंते ध्वमदयं नानि याति पुष्पे कृमिन्यो मधु मदनां सवै
विलासैः ॥ प्रह्लादाः कृतिगादते क्रियाकन्नापैः राजानो विगारिनते वैरिभिः प्रतापैः ॥१५॥
यथा ॥ धन्याः पथिककौतौनां रेखेनुलन्मुचां मुहुः ॥ विलसत्य धुनः देवा जो घोगोमही
मृतां ॥ २ ॥ यथा ॥ मृत्युश्रयत्याप्तः पतनायै स्वर्यश्चालिने श्रेसत ॥ अपांडुपत्रतिपतन्त्रेनते
स्पृहवंधनगे ये ॥ ३ ॥ यथा ॥ गुरुगुरुरूषयाबुद्धिर्मधुगोष्ठ्या मनो भवः ॥ उदयेन कुरङ्गाकस्य पयोध
धिर्विवर्द्धते ॥ १६ ॥ क्रियैव स्वतदर्थान्यपरव्यापनिदर्शनं ॥ ४१६ ॥ उक्तिसिद्धे
वस्तुनोऽन्योन्यस्यैव न्यासः ॥ यथा ॥ श्रियेणासंगम्यश्च विपक्षसन्निधा उपाहितो वक्षसि पीवर
स्तने ॥ स्वजनेन कोचींहि न हेतन्ना विलोदिशांतिश्रीमागुणा नवे स्तोति ॥ १८ ॥ उपमेयस्य गुणः

वामन

निरेक्रियत्वं व्यतिरेकः॥ यथा॥ सत्यं हरिणशावाक्ष्याः प्रसन्नं सुभगं मुखं॥ समानं शशिनः किं
तु सकलंकौ विडंबितः॥१७॥ एकगुणहानिकल्पनायां साम्यदार्ढ्यं विशेषोक्तिः॥ यथा॥ भा
वे नियत्रैव धायोरजन्यामनेलरः सुरतप्रदीपाः॥१८॥ इति॥ संभाव्यविशिष्टकर्माकरणान्निं
१९ दास्तोत्रार्थं व्याजस्तुतिः॥ यथा॥ सेवेवं प्रसिंधुंगिरिचक्रमतौ लैविभेदस्सहेकश्चारेणतानानां॥ स
वैविधं कर्मेलतानरामः स्वया कृतेनत्र मुधे यन हि॥१९॥ व्याजस्य सत्यसारूप्यं व्याजोक्तिः॥
यथा॥ शाम्भेर उपश्रुगोरेण नाला विष्णुनभो विनि॥ कोधापुष्यल्बवेनेदसाक्रपानेमुस्यं कृतं॥२०॥
विशिष्टेन साम्यार्थमेककालक्रियायोगस्तुल्ययोगिता॥ यथा॥ जलधिवसनामिमां धारत्री
वहति भुजेन बेहैभुमवडू जस्यभि॥२१॥ उपमानाक्षेपश्चाक्षेपः॥ यथा॥ तस्याश्चेन्मुखमस्ति सौम्यसुभगं राम
किं पार्वणेनेन्दुना सौन्दर्यस्य पदं दृशौ यदि च तैः किं नाम नीलोत्पलैः॥ किं वा कोमलकांतिभिः किसलयैः
स त्येव नामाधरे हा धातुः पुनरुक्तवस्तुरचनारंभेष्वपूर्वो ग्रहः॥२२॥ वस्तुनः क्रिययोः स्तुत्यैककालयोरेक
पदाभिधानं सहोक्तिः॥ यथा॥ अस्तोभास्वान् प्रयातः सह रिपुभिरयं संह्रियंतां वलानि॥२३॥
यत्सादृश्यं पतत्संपत्तिः समाहितं॥ यथा॥ तन्वी मेघजलार्द्रपल्लवतया धौतां वरेवाश्रुभिः शून्येवाभ

२

मा

रयोः स्वकान्तविरहाद्विभ्रान्तपुष्पा द्रुमा॥ चिंतामोहस्तम्भिता मधुलिहां श्रेणिनालक्ष्यते वेंडीमव ... यपादपतितं ... तापेवसा॥ २४॥ अलंकारस्यालंकारयोनित्वं संस्पृष्टिः॥ तद्भेदावुपमारूपकोत्प्रेक्षावयवौ॥ तस्याः संसृष्टेर्भेदौ उपमारूपकं उत्प्रेक्षावयवश्चेति॥ यथा॥ ... निपुरंध्रिलोचननिलकद्द्र ... माद्यत्पद्मलद्विरेफः ... द्याहनि॥ उत्प्रेक्षाहेतुरुत्प्रेक्षावयवः॥ यथा॥ अंगुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः॥ कुड्मलीकृतसरोजलोचनं चुंबतीव रजनीमुखं शशी॥ २५॥ अत्र एभिर्लक्षणैः स्वीयैः परकीयैश्च पुष्कलैः॥ वेदुवैचित्र्यगर्भेयमुपमा साप्रपंचिता॥ १॥ इति वामनसूत्रलक्षणं सूक्ष्मनयादर्शितम्॥ ॥